International Journal of Applied Research 2019; 5(9): 352-355




**ISSN Print:** 2394-7500
**ISSN Online:** 2394-5869
**Impact Factor:** 5.2
IJAR 2019; 5(9): 352-355
www.allresearchjournal.com
Received: 15-07-2019
Accepted: 26-08-2019

**डॉ0 पवन कुमार**
ग्राम –फेंट, पोस्ट–बासोपट्टी,
जिला–मधुबनी, बिहार, भारत

# शास्त्रे लोके च सीतायाश्चरितं महत्

**डॉ0 पवन कुमार**

**प्रस्तावना**

बालकाण्डे तृतीयसर्गे रामायण – काव्यगत– विषयाणां संक्षिप्तोल्लेखे– प्रसङ्गे

''स्वराष्ट्र–रञ्जनं चैव वैदेह्याश्च विसर्जनम्।
अनागतं च यत् किञ्चिद् रामस्य वसुधातले।
तच्चकारोत्तरे काव्ये वाल्मीकिर्भगवानृषिः।। [1]

इतिविषय– निर्देश असङ्गतो भवेत्। तथा च बालकाण्स्यापि प्राचेतस – वाल्मीकिकर्तृकत्वं न स्यात्। वाल्मीकिरामायणस्य अनुष्ठान–विधि–प्रदर्शके अनुष्ठानप्रकाशग्रन्थे–

युद्धस्यैव तु काण्डस्य विश्रामः संप्रकीर्तितः।
तथा चोत्तरकाण्डस्य षट्त्रिंशत् सर्ग–पूरणे।।
अष्टमे दिवसे कृत्वा स्थितिं च नवमे दिने।
शेषं समाप्य युईस्य चान्त्यं सर्ग पुनः पठेत्।।

भवति। उत्तरकाण्डवृत्तान्तेनैव सीतायाश्चरितं महत् इति कथनस्य सिद्धिर्भवति। अतोऽति हेतोः बालोत्तरकाण्डयोरेक– कर्तृकत्वं समकालिकत्वं च सिध्यतः।

वेदवती– वृत्तान्तः–रामायणस्य उत्तरकाण्डे सप्तदशे सर्गे ब्रह्मर्षि कन्याया वेदवत्या वृत्तन्तः उत्तरकाण्डस्य बालकाण्डस्य च एककर्तृकत्वं बोधयति। तद्यथा–

''यस्मात्तु धर्षिता चाहं त्वया पापात्मना वने।
तस्मात् तव वधार्थ हि समुत्पत्स्य अहं पुनः।।
तस्यात्तयोनिघा साध्वी भवेयं धर्मिणः सुता।। [2]

इयमेव वेदवतो अयोनिजा जनकात्मजा वभूव, या रावण–वधस्य अद्धितीयं कारणमभूत् अयोध्याकाण्डस्य अष्टादशाधिकशततमे सर्गे सीतादेवी अनसूयां स्वजन्मवृत्तान्तमेवमेव निगदति। एवमेव वृत्तान्तं सीताजन्म–प्रसङ्गे महाराजसीरध्वजजनकः प्रतिपादयति। एवञ्च समानरूपेण वर्णिता इमे वृत्तान्ताः पूर्वोक्तकाण्डत्रयस्य एककर्तृकत्वे साधयन्ति।

इत्येवं प्रकारेण उत्तरकाण्डस्य पाठविधि–निरूपणात् सप्तानामपि काण्डानां निश्चिता एककालावस्थितिरसंगता स्यात्।

**Correspondence**
**डॉ0 पवन कुमार**
ग्राम –फेंट, पोस्ट–बासोपट्टी,
जिला–मधुबनी, बिहार, भारत

बृहद्धर्मपुराणे वाल्मीकि–

रामायणस्य पृथक्–पृथक् काण्ड– पाठ– प्रयोजन– प्रतिपादन– प्रसङ्गे–

यः पठेच्छृणुयाद् वापि काण्डमभ्युदयोत्तरम्।
आनन्दकार्ये यात्रायां सजयी परतोऽत्र च।। [3]

इत्युत्तरकाण्ड–फल–निरूपणात् एतत्काण्डस्यापि एककालिकास्तित्वं निर्णीयते।

सीतायाश्चरितं महत [4] सीतादेव्या यन्मदृच्चरितं प्रारम्भे संसूच्यते तस्य विस्तरशः प्रदर्शन मुत्तरकाण्डे एव भवति। सुन्दरकाण्डे अशोकवाटिकायां सीतायाः सच्चरित्र्यस्य प्रतिपादनम् सती–सावित्र्यनसूयादिपतिव्रतानामिव। किन्तु ''सर्वसीमन्तिनीभ्यश्च सीता सीमन्तिनी वराः। [5] इत्युद्घोषस्य सीतायाश्चारित्र्यद्वारा व्यावहारिक प्रदर्शनम् उत्तरकाण्डे एव अनरण्यवृत्तान्तः– उत्तरकाण्डस्य एकोनविंशे सर्गे वर्णितः इक्ष्वाकुकुलनन्दस्य अनरण्यस्य वृत्तान्तः बालोत्तरकाण्डयोरेककतृकतां सूचयति।

रावणेन वशीकृतः अनरण्यः अन्तसमये रावणं शपन् प्रोवाच–
''उत्पत्स्यते कुले ह्यस्मिन्निच्वाकूणां महात्मनाम्।
रामो दाशरथिर्नाम स ते प्राणान् हरिष्यति।। [6]

एवञ्च अन्तः साक्ष्येन पूर्वोक्तबहिः साक्ष्येण च सप्तानापि काण्डानां रचयिता ब्रह्मर्षिवाल्मीकिरेवेति निश्चीयते। तथाहि ग्रन्थादौ ग्रन्थमध्ये ग्रन्थान्ते च विघ्नविधाताय मंलानि आचारणीयानीति परम्परा, तथैव आदौ मध्ये अन्ते च रोचनार्था फलश्रुतिर्विधेयेति पारम्पर्यक्रमादागतो व्यवहारः। फलश्रुतिं सम्यगवत्य पाठकः सश्रद्धं तदनुष्ठाने प्रवर्तते। स्वाभीष्टं फलं च लभते। अतोऽनेकेषु स्थलेषु फलश्रुतिर्विधीयते। अतएव युद्धकाण्डान्ते रावण–वधात् परम् सीतादेव्याः समागमयानान्तरं श्रीरामभद्रस्य राज्याभिषेके सम्पन्ने आधिकारिकाकथावस्तु समापनं भवतीति काण्डान्ते फल–निर्देशो भवति। किन्तु अयोध्याकाण्डादेव मूलरामायणस्य प्रारम्भे स्वीकृते बालकाण्डस्य विषय–वस्तूनां युद्धकाण्डसमापन– समये अज्ञानाम् विषय– संगतिनैव अवेत्। युद्धकाण्डान्ते च या जिज्ञासाः पाठक– मानसेषु अवन्ति तासां निराकरणमपि उत्तरकाण्डं विना न शक्तये कर्तुम्।

तमिस्रामूर्च्छालत्रिजगदगदंकारकिरणे
रघूणां गोत्रस्य प्रसवितरि देवे सवितरि।
पुरःस्थे दिक्पालैः सह परगृहावासवचना–
त्प्रविष्टा वैदेही दहनमथ शुद्धा च निरगात्।। [7]

तमिस्रा तामसी रात्रिरेव मूर्च्छा निष्क्रियतासम्पादिका तद्वत् यत् जगत् तस्य अगदौराः नैरुज्यसम्पादकाः किरणा यस्य तादृशे तामसीनिशानिष्क्रियजगन्निद्वेष्टताहरैः किरणैरुपेते रघूणां गोत्रस्य वंशस्य प्रसवितरि प्रवर्त्तके देव सवितरि सूर्ये दिक्पालैः इन्द्रादिभिः सह पुरःस्थे अग्रवर्तिनि पश्यति सति परगृहे राक्षसराजभवेनेय आवासः कियन्तं कालं यावत् स्थितिः तद्वचनात् तन्निमित्तकनिन्दावाक्यात् हेतोः वैदेही सीता दहनम् अग्निं प्रविष्टा। अथ प्रवेशानन्तरं शुद्धा पवित्रा निरगात् बहिर्गता। यस्य सूर्यस्य कराः तामसीरात्रिनिष्क्रियस्य जगन्नयस्य सक्रियतासम्पादनेन मूर्च्छामिव निवर्त्तयन्ति, य सूर्यो रघुवंश स्यादिपुरुषः, तस्मिन् सूर्ये दिक्पालैः, सह साक्षिणि सति परगृहावासप्रभवचरित्रनिन्दाकलौं प्रक्षालयितुं सीता विं प्रविष्टा तत्र शुद्धा च ततो निरगादित्यर्थः। 'सिध्मादिभ्यद्वे'ति लचि मूर्च्छालपदम्। अगदौरो भिषक्, 'कारे सत्यागदस्य' इति मुम् शिखरिणीवृत्तम्।

राघवो रामः राक्षसचमूचक्रस्य राक्षससेनासमुदायस्य एकैकानि शिरांसि निजे तेजोग्नौ स्वप्रतापानले हुत्वा होमं कृत्वा अथ तदनन्तरं दशकण्ठमूर्द्धभिर्दशभी रावणशिरोभिः पूर्णाहुतिं पूर्णहोमं निर्माय समाप्तिकालिकीं पूर्णाहुतिं च कृत्वा जगतः स्वस्त्ययनं मंलकृत्यं समाप्य लौन्द्रवन्दीकृतां रावणेन कारागृहे स्थापिताम् सीताम् अपि अवलोक्य दृष्ट्वा अद्य सम्प्रति शोकेन–व्यर्थमिमे निरपराधा राक्षसा मया हता इति दुःखेन, रभसेन विशुद्धायाः सीताया लाभाज्जायमानेन प्रमोदेन, ब्रीडया निष्करुणेन मया स्वतः शुद्धाऽपि सीता जानतापि वह्निप्रवेशकष्टं प्रापितेति लज्जया च जडः विमुग्धः अस्तीति शेषः।

अथ सीता वह्निप्रवेशकृतशुद्धचनन्तरम् एव सुग्रीवविभीषणाभ्याम् सह सौमित्रिर्लक्ष्मणः सीता च ताभ्यां परिपूर्णौ संभृतौ पार्कौ सव्येतरभागौ यस्य तथोक्तः रामः वैवस्वतवंशस्य सूर्यकुलस्य वृत्तेन चरित्रेण मेध्याम् पवित्रीकृताम् अयोध्याम् पुष्पकेण तदाख्येन कुवेरस्य वायुयानेन उपैति आगच्छति। किौर्वाणः किौर अज्ञानुवर्त्ती यः पयोधिः सागरस्तेन सेवितानि गृहोद्यानानि यस्यां तादृशी तथा रघुवंशविक्रमकथायाः रघुवंशपराक्रमगाथायाः प्ररोहस्थली उत्पत्तिक्षेत्रम् इयं लौा अधुना सम्प्रति देवेन भवता रामेणालोक्यतां दृश्यताम्, अत्र भवता छिन्नैर्दशाननस्य दशभिः शिरोभिः एकैकेन शिरसा शतमखस्य इन्द्रस्य शतं शतं दृष्टयः क्रमात् आमोदिताः प्रसन्नीकृताः। इन्द्रस्य प्रथमाः शतं दृष्टयः एकेन छिन्नेन शिरसा आनन्दिताः, तदनन्तरं द्वितीयाः शतं दृष्टयो द्वितीयेन शिरसा च्छिन्नेनेत्येवंक्रमेण सहस्रमपि दृष्टयो दशभिः शिरोभिछिन्नैरामोदिता इति विवक्षितोऽर्थः। [8]

लङ्का पूर्वेण–लौातः पूर्वस्यां दिशि। सुवेलं पश्चिमेन सुवेलपर्वतात् पश्चिमायां च दिशि दृश्यतामित्यर्थः। त्वम् सीता एव अर्थः प्रयोजनं यस्य सः त्वदर्थीयो रावणः रामश्च तयोर्ये क्रव्यात्कपिकुले राक्षसवानरसमुदायौ तयोः समुदाययोः कबन्धव्यतिकरैः छिन्नशिरोदेहराशिसंमिश्रणैः कराला भीषणा इयं समरभूमिः अद्यापि युद्धे निवृत्तेऽपि भुवनभयं त्रिलोकीभीतिं तनुते करोति, इह अत्र समरभूमौ रुधिरमथ्यः शोणितरचिताः सहस्रं सहस्रसंख्याकाः अम्भोधेर्युवतयः सागरस्य स्त्रियोऽभूवन अजायन्त, त्रिदशयुवतीनां देवांनानां च साहस्राः सहस्रपरिमाणाः पतयोऽभूवन्। सीतामथ्रयमानानां कपीनां क्रव्यादानाञ्च मृतानां तनवोऽत्र युद्धक्षेत्रे सह

मिलिताः सन्तीति युद्धसमाप्तावपीदं युद्धक्षेत्रं त्रिभुवनभयं जनयति, किञ्चात्र रणक्षेत्रे सहस्रं शोणितनद्यः सहस्रं युद्धे मृता देवानाभिः पतित्वेन वृताश्चाजायन्त वीरा इत्यर्थः। 'शतमानविंशतिकसहस्रादण्' इति अण्प्रत्यये सहस्रमेव साहस्राः शिखरिणी वृत्तम्।

इह अस्मिन् समरक्षेत्रे कपयो वानरसैनिकाः मायातमोभिः मायाकल्पितान्धकारैः अपलपितां छन्नाम् द्याम् आकाशम् दृष्टम् निजं स्ववर्त्तिपन्नगरत्नमात्रम् सर्पफणामणिमात्रम् यत्र तादृशान् दृश्यमानमणिमात्रप्रकाशान् चन्दनतरून् अस्त्राणि चन्दनवृक्षरूपप्रहरणानि उद्यम्य उत्थाप्य उपरि आकाशे भ्रमन्तः सन्तः ज्योतिरिंणमयीम् खद्योतव्याप्ताम् वितेनुः कृतवन्तः। अत्र रणक्षेत्रे मेघनादेन मायातमसा व्योम्नि आवृते सति यदा किमपि कुत्रापि नादृश्यत तदा वानरसैनिकाः चन्दनतरूनस्त्रीकृत्योपरि भ्रमितुमारभन्त, तत्र चन्दनतरुषु स्थितानां सर्पाणां फणामणय एवप केवला अदृश्यन्त, तदित्थं व्योम्नि सर्पमणिप्रकाशाः खद्योता इव प्रतीयन्ते स्मेति भावः।

अत्रैव समरक्षेत्रे भुजंपाशबन्धनम् नागपाशबन्धनम् सीतया अनुभाविताः सीताहेतुनैव यूयमपि नागपाशैरबध्यध्वमिति भावः। आमिति स्मरणस्वीकृत्योरभिव्यञ्जकमव्ययम्। इह अत्र प्रदेशे चर्वितः पीनः स्थूलोऽहिगणे नागसमुदायो येन तथोक्तः, अभीक्ष्णम् पुनः पुनः ठणितिशब्दानुकृतिः तादृशशब्दपूर्वकम् विनिष्ठ तफणिमणिः उद्गीर्णसर्पफणरत्नः स विहगेन्द्रो गरुडः नौ आवयो रामलक्ष्मणयोः धनबन्धनवैधुर्य दृढ़नागपाशबन्धजनितवैक्लव्यम् व्यधुनोत् दूरीकृतवान्। अत्रैवावयोर्नागपाशबद्धयोर्निर – स्तसमस्तव्यापारयोश्च सतोर्विह्वलतामालोक्य सत्वर–मुपगतो गरुडो बन्धनरज्जुभावं गतान् सर्पान चर्वित्वा तदीयफणामणीन् भक्षः यितुमयोग्यतयोद्गीर्य चावां बन्धनमुक्तानकार्षीदित्यर्थः। [9]

कृष्णोरःस्थापि कृष्णहृदयवासिनी अपि सुभटभुजवसतिः। वीरजनभुजदण्डनिवासिनी लक्ष्मीः सम्पत्, स च मृडचूडामणिः शङ्करशिरोभूषणम् अपि जगताम् अलङ्कारा इन्दुश्चन्द्रश्च अस्य सागरस्य यादो जलजन्तुः। अत्र सागरे जलजन्तुसाधारण्येन वसन्तावेव लक्ष्मीचन्द्रौ लोके तावर्ती प्रतिष्ठां गतावित्यहो श्लाध्यानुभावोऽयं सागर इत्याशयः।

यदि तोयं जलम् अमृतप्रकृतिः अमृतसमानगुणम् स्यात् स्यादेव चुक्तमेव तस्यामृतसमानगुणत्वम् इदम् जलस्यामृतप्रकृतित्वम् न एकान्तमद्भुतम् अत्याश्चर्यम् पुनः किन्तु न अस्माकमद्भुतम्, केवलं वयमेव जलस्यामृतप्रकृतित्वमा चर्यं मन्यामहे न पुनरिदं वस्तुतस्तथेत्यर्थः। यत् यस्मात् लक्ष्मीः श्रीः तुषारकरश्चन्द्रः, कौस्तुभो मणिभेदः, पारिजातो देवद्रुमः, धन्वन्तरिर्वैद्यकविद्याप्रवर्त्तकः, एतत्प्रभृतयः अस्य सिन्धोरपां विवर्त्तः जलस्य परिणामः, यदि लक्ष्म्यादीनां जनकं जलं तदा तस्यामृतसमगुणत्वं नायुक्तमिति भावः। 'प्रकृतिर्गुणसाम्ये स्यादि'ति विश्वः।

अत्र समुद्रे अरविन्दनाभः पद्मनाभो विष्णुः आकण्ठदृष्टशिरसा कण्ठपर्यन्तं दृष्टमस्तकेनापि अविभाव्यपृष्ठपार्श्वो चतुर्मुखतया शिरस्सु कण्ठपर्यन्तं दृश्यमानेष्वपि सकलशिरोऽनुरूपपृष्ठपार्श्वदेशोदराद्यवयवा यस्य न शक्यन्ते विभावयितुं तादृशेन नाभीसरोरुहजुषा नाभिकमलस्थितेन चतुराननेन ब्रह्मणा चिरम् बहुकालपर्यन्तम् ऋग्भिः वैदिकमन्त्रैः उपास्यमानः वन्द्यमानः सन् शेते निद्राति। अस्मिन् सागरे ब्रह्मणा स्तूयमानो विष्णुः शेते, ब्रह्मा हि तन्नाभिस्थितः, विष्णुना ब्रह्मना ब्रह्मणो मुखानि दृश्यन्ते परं तदनुकूला अन्ये पृष्ठाद्यवयवा न दृश्यन्ते, तत्र कारणद्वयं सम्भवति, तत्रैकं तावत्तेषां पृथगभाव एव, भावेऽपि नाभिस्थितस्य वस्तुनः शयानो जनः केवलमुपरितनं भागमेव साक्षात्कर्त्तुमीशो नाधस्तनमपि भागमिति।

उत्सर्पिणी बर्धमाना। धर्मोत्तराणाम् धर्मप्रधानानाम् धर्मनिष्ठानाम्। अयम् अपांनिधिः समुद्रः कल्पोच्छित्तौ सृष्टिसंहारसमये जगत् जरयतु पयसा प्लावयित्वा संहरतु, पयोधरान् पिपर्त्तु जलप्रदानेन पालयतु, बडवावक्त्ज्योतिः वडवानलम् वहतु धारयतु, सुधाभुजो देवान् दधातु अमृतप्रदानद्वारा पुष्णातु, वपुषा यावाँस्तावान् यत्परिमाणस्तत्परिमाणो वा भवतु, पुनः किन्तु अगस्त्यरुषा अगस्त्यमुनिकोपेन अयं सागरः ईषत्पानः अनायासं पातुं शक्यः, हे तपांसि वः युष्मभ्यं नमः, तद् धन्यं तपो यत्प्रभावेण विस्तीर्णमपि जगत्संहारसमर्थमपि सागरमगस्त्यकोपः पातुमक्षमत, तदस्तु नमस्तपस इत्यर्थः हरिणीवृत्तम्।

सीतायाः विषये महर्षिः अगस्त्यस्य वचनम्—कलशात् कुम्भात् जन्म यस्य तथोक्तस्य मुनेरगस्त्यस्य कापि अनिर्वाच्या गम्भीरता जयति यया अगस्त्यगम्भीरतया अम्भसांनिधिः सागरोऽपि चुलुकं गण्डूषमात्रं करघृतजलं समुत्पद्यते, अतिशायिनी गम्भीरताऽगस्त्यस्य यत्समीपे समुद्रोऽपि चुलुकमात्रस्वरूपो जात इत्यर्थः। पुनः अस्यागस्त्यस्य उत्तंतां विशालताम् विवरीतुं वर्णयितुं न ईश्महे न प्रभवामः, यया उत्तुंतया सोऽपि सुमैरुस्पर्धयोत्तिष्ठठमानोऽपि विन्ध्याचलः उच्चकैः उन्नतो न भवति, यदीयोत्तुंता विन्ध्यमपि नमयामासेत्यर्थः। [10]

सेतोर्बन्धस्य उद्योगे उपक्रमे सपदि तत्क्षणात् शैलानाम् पर्वतानाम् क्षेपात् पातनात् उच्छलितैः सलिलव्यूहैः जलराशिभिः तुच्छे स्वल्पजले वाराम्पत्यौ सागरे निम्नगाः नद्यः कालेन उपयुक्तसमयेन अन्तस्तिमिभ्यः अन्तर्गतेभ्यस्तिमिमत्स्येभ्यः लवणादन्यम् क्षारभिन्नम् मथुरं मिष्टम् अपां स्वादमुद्भेदयन्त्यः प्रकटीकुर्वत्यः पटुतररयं महता वेगेन सन्निपेतुः पतिताः। सेतुनिर्माणपर्वतेषु क्षिप्यमाणेषूच्छलति जलराशौ सागरस्य स्वल्पावशिष्टजलतया तिमयो यावल्लवणमयं जलस्वादमनुभवन्ति तावदेव हि तेभ्यो मधुरं सागरजलस्वादमुद्भेदयन्त्यो नद्यः सागरे न्यपतन्नित्यर्थः। यावत्पत्युरयशो दारिद्रयकृतं वर्धते तावत्तत्पत्न्यः स्वधनैस्तत्प्रतिष्ठां रक्षन्तीति ध्वन्यते। मन्दाक्रान्तावृत्तम्।

पुरस्तात् सेतुनिर्माणप्रथमप्रहरे विन्यस्ताः सागरे क्षिप्ताः सेतुशैलाः सद्यः पातसमकालम् दरीभिः गुहाभिः जलधिं सागरजलं पीत्वा अथ जलधिपाने कृते दृष्टे मैनाके नाम बन्धौ समुद्रगर्भस्थमैनाकरूपस्वसुहृद्दर्शनेन यः प्रीतिप्रौढ़ आनन्दोत्थः अश्रुपूरः नेत्रजलप्रवाहस्तेन द्विगुणितमहिमभिः द्विगुणीभूतमहत्त्वशालिभिर्निर्झरैः पूरयन्तः सागरं समेधयन्तः सेतुशैलाः सेतुधृताः पर्वताः, ते निशि निशि प्रतिरात्रं ज्वलद्भिर्दीप्यमानैः ओषधीनां

निवहैः समूहैः तदात्वे सेतुबन्धकाले उषितानां वासं कृतवताम् कपीनां वानराणां शिबिरस्य सेनासन्निवेशस्य स्मारिणः स्मारकाः दृश्यन्ते। ये पर्वताः सेतवे समुद्रे क्षिप्यमाणास्तत्कालमेव सागरस्य जलं स्वदरीभिर्निपीय तद्गर्भस्थित – स्वसुहृन्मैनाकदर्शनजातानन्दाश्रुप्रवाह– द्विगुणीभूतस्वनिर्झरजलैः सागरं पुनरप्यपूरयन्, निशि निशि ज्वलद्भिः स्वावस्थितौषधिभि ये तत्कालतत्रोषितवानरसैन्यस्मारणं पिंलवर्णस्वप्रभया कारयन्ति, ते पर्वता विलोक्यन्त इत्यर्थः।

लङ्केश्वरस्य रावणस्य परिभवे पराजये छेदे विनाशे च निष्णातदोष्णा समर्थभुजेन वत्सेन ररामेण यत् त्रिजगत् लोकत्रयम् अभयं गतसकलभयम् चक्रे कृतम् तत् रामकर्त्तृकं रावणवधद्वारकं जगदभयम् न अस्मान् नः चित्रीयते न विस्मापयति, यत् यस्मात् बालेन शिशुना रामेण अमुना आजौ युद्धे सः प्रसिद्धो मुनिः परशुररामः विगलितवतः दूरपरराहतस्य वीर्यनिर्यासराशेः वीर्यसारसमूहस्य पिण्याकः तिलकल्कः निर्मितः कृतः निर्वीर्यतां गमितः, येन रामेण बाल्यावस्थायामेव परशुरामो निर्वीयः कृतस्तस्य ररावणविजयद्वारा जगदभयजननं ना र्य–करमित्यर्थः। [11]

भल्लेन अस्त्रविशेषेण अवलूनं छिन्नं दशकन्धरस्य रावणस्य कण्ठपीठम् तस्य सीमायाम् अवसाने समाप्तः शेषतां गतः भुजविक्रमकर्मकाण्डः बाहुपराक्रमप्रदर्शनकमकलापो यस्य तथोक्तः भल्लनामकेनास्त्रेण ररावणशिरसश्च्छेदनं कृत्वा विजेतव्याभावात् समापितभुजवीर्यप्रकाशनात्मकक्रियाकलापः जगद्विजयमांलिकैः विकृविजयमंलमयैर्यशोभिः (उपलक्षितः) सोऽयं रामचन्द्रः दिष्ट्या भाग्यवशात् पुनः नयनवर्त्मनि वर्त्तत इति शेषः।

## निष्कर्षः

एवञ्च न केवलं संस्कृतशास्त्रे अपितु विश्वस्य प्रायः सर्वस्विन् शास्त्रे सीतायाः चरितं महद् अनुकरणीयञ्च विद्यते। एवमेव लोकेऽपि सीतायाः सदाचरणम् आदर्शरूपेण प्रतिष्ठितो अस्ति भविष्यति चेति। तेन मानवस्य सर्वविधसंरक्षणं संवर्धनं च भवति भविष्यति इति।

## सन्दर्भाः

1. वाल्मीकिरामायणे–7/111/18।
2. तत्रैव–2/16/4।
3. तत्रैव–113/38–39।
4. बृहद्धर्मे पूर्व खण्डे 26 तमे अध्याये–9–13
5. तत्रैव–1/4/7।
6. बालकाण्डे–9/18–19।
7. अनर्घराघवम्– 7/1।
8. अनर्घराघवम्– 7/4।
9. अनर्घराघवम्– 7/7।
10. अनर्घराघवम्– 7/16।
11. अनर्घराघवम्– 7/134।